ISSN : 2395-4132

# THE EXPRESSION

## An International Multidisciplinary e-Journal

**Bimonthly Refereed & Indexed Open Access e-Journal**

The Expression Journal

Impact Factor 3.9

**Vol. 8 Issue 1 February 2022**

Editor-in-Chief : Dr. Bijender Singh

Email : editor@expressionjournal.com

www.expressionjournal.com

The Expression: An International Multidisciplinary e-Journal
(A Peer Reviewed and Indexed Journal with Impact Factor 3.9)
www.expressionjournal.com ISSN: 2395-4132

# भाष्यदृष्ट्या व्याकरणपदार्थविवेचनम् एवम व्याकरणाध्ययनस्य प्रयोजनम्

**डॉ. मुकेश कुमार शर्मा**
**राजकीय संस्कृत महाविद्यालय, फागली, हिमाचल प्रदेश**

:::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::

## सारांश

**शङ्खचक्रमहामुद्रा पुस्तकाढ्यं चतुर्भुजम् ।**

**सम्पूर्णचन्द्रसङ्काशं हयग्रीवमुपास्महे ॥१॥**

व्याकरणं नामशास्त्रं "शासनाच्छंसनाच्चैव शास्त्रमित्यभिधीयते" यद् विषयकमध्ययनप्रयो- जनज्ञानमपेक्षते तद् विषयकज्ञानं कारणं भवति अत्र मूलं विशेषज्ञाने सामान्यज्ञानं कारणम् ।

अतः किमिदं व्याकरणतत्त्वमिति जिज्ञासायां प्रथमस्तावद् व्याकरणपदार्थो विविच्यते-तद्यथा व्या- क्रियन्ते व्युत्पाद्यन्ते असाधुशब्देभ्यो विविच्य साधु- शब्दाः पृथक्क्रियन्ते येन तद् व्याकरणम्, व्याङुप- सृष्टयोः कृधातोः करणाधिकरणयोश्च इति करणे ल्युटि सति साधुत्वं बोध्यते ।

अत्रायमाशयो व्याकृतिकरणं व्याकरणमित्युक्ते आनुसङ्गिकोऽयं सन्देहो जायते कमवधिकृत्य व्याकृतिकरणम्, उक्तसन्देहप्रशमाय विवृयते- असाधुशब्दावधिकसाधुशब्दकर्मकपृथक्कृतिप्रयो- जनकतानियमविशेषो व्याकरणमिति ।

## कुंजी शब्द

भगवता पतञ्जलिना कानि पुनः शब्दानु- शासनस्य प्रयोजनानि इत्युक्त्वा त्रयोदशानुषङ्गिकप्रयोज- नानि प्रोक्तानि । (१) तेऽसुरा-तेहसुराहेलयो हेलय इति कुर्वन्तः पराबभूवुः । तस्माद् ब्राह्मणेन नम्ले- च्छितवै नापभाषितवै म्लेच्छो हवा यदपशब्दः (तेह- सुराः) तानि च कानि इति जिज्ञासायां- १. तेहसुराः, २. दुष्टः शब्दः, ३. यदधीतम्, ४. यस्तप्रयुक्ते, ५. अविद्वांसः, ६. विभक्तिं कुर्वन्ति, ७. यो वा- इमाम्, ८. चत्वारि, ९. उतत्वा, १०. सक्तमिव, ११. सारस्वती, १२. दशम्यां पुत्रस्य, १३. सुदेवो- डिसवरुणः ।

:::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::

# भाष्यदृष्ट्या व्याकरणपदार्थविवेचनम् एवम व्याकरणाध्ययनस्य प्रयोजनम्

**डॉ. मुकेश कुमार शर्मा**
**राजकीय संस्कृत महाविद्यालय, फागली, हिमाचल प्रदेश**

::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::::

तत्रभवान् पतञ्जलिःव्याकरणमित्यस्यप्रश्नमुद्भाव्य पूर्व समाधानद्वयं प्रोवाच। आदौ सूत्रं व्याकरणं द्वितीयं शब्दो व्याकरणमिति। एवमुक्त्वा उभयस्मिन् पक्षे सिद्धान्तभाष्यं लक्ष्यलक्षणे दोषाणामुपलब्धेः व्याकरणमिति निर्दिष्टवान्। तत्र व्याकरण पदार्थनिरूपणप्रसङ्गे यथाभाष्यक्रमानुरोधेन पक्ष- प्रतिपक्षौ विचार्येते।

हि सूत्रत एव शब्दान् प्रतिपद्यन्ते, अर्थाद् व्याकरणद्वारा शब्दव्युत्पत्तिः, तच्च ज्ञानं भवति, किन्तु केवलं सूत्रैः शब्दावगमो न भवति। इत्थं सूत्रे व्याकरणे दोषद्वयं भाष्ये उपन्यस्तम्।

**(१) भाष्यम्-**

**(क) सूत्रम्-**

सूत्रे व्याकरणे इति पक्षे भगवता भाष्यकारेण शब्दाप्रतिपत्तिरिति प्रतिपादिते द्वितीये दोषे सति अभाणि यद् व्याकरणद्वारा शब्दानां ज्ञानं (व्युत्पत्तिः) भवति, किन्तु केवलं सूत्रैः शब्दावगमो न भवति अपि तु व्याख्यातोऽवगमो भवति। इत्थं कैश्चित् आशङ्कयते यत् तदेव पाणिनीयसूत्रं विगृहीतसूत्रं व्याख्यानं भवति। इत्थं सूत्रव्याख्यानयोः आन्तर्यं नास्तीति तन्न, यतो हि केवलानि चर्चापदानि व्याख्यानं यथा-वृद्धिः आत् ऐच् इति अपि तु उदा- हरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत् समुदितं व्याख्यानं भवति, तथा च सूत्रे उदाहरणं प्रत्युदाहरणं वाक्याध्याहारेत्यादीनामभावदर्शनात् सूत्रव्याख्या- नयोः भिन्नता अस्त्येव। अतः सूत्रैः शब्दावगमा- भावात् सूत्रं व्याकरणमिति पक्षो नोचितः।

सूत्रं व्याकरणमिति व्याकरणस्य स्वरूप- स्वीकारे 'व्याकरणस्य सूत्रमिति। शिष्ट प्रयोगानुपपत्तिर्भवति। अत एव भाष्ये आह-'सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नः'। सूत्रं व्याकरणमित्यत्र अभेदप्रतीतिर्भवति अत एव व्याकरणस्य सूत्रमिति शिष्टप्रयोगानुपपत्तिरिति वार्तिकाशयः, यतो हि षष्ठीविभक्तिः भेदविवक्षायामेव भवति। सूत्रं व्या- करणमित्यत्राभेदत्वात् सूत्रमिति शिष्टप्रयोगस्य सिद्धिर्भवितुं नार्हति। पक्षेऽस्मिन् दोषान्तरभाष्यं शब्दाप्रतिपत्तिरित्याह। शब्दानां चाप्रतिपत्तिः प्राप्नोति। नूनमेव व्याकरणाच्छब्दान् प्रतिपद्यामहे न

(ख) शब्दः-

व्याकरणस्वरूपप्रतिपादने सूत्रं व्याकरण- मित्यत्र दोषसत्त्वाद् उच्यते यत् शब्दः व्याकरणमितिपक्षः स्वीक्रियताम्, तदपि नोचितम्, यतो हि शब्दे अनेनेति व्याकरणम्। न हि शब्देन किञ्चिद् व्या- व्याकरणे ल्यूडों नोपपते। व्याक्रियन्ते शब्दा क्रियते। अर्थाद व्याकरणशब्दे 'करणाधिकरणयोन' मिति इति सुत्रेण विहितः ल्युप्रत्ययः तस्योपपत्तिर्न लक्ष्यं व्याकरणमुच्यते। न हि शब्देन शब्दा व्याकृता जायते। यतो हि येन शब्दा व्याकृता भवन्ति तद भवन्ति, अत एव शब्दो व्याकरणमित्यस्मिन् पक्षेऽपि दूषणं विद्यते।

एवं प्रकारेण सूत्रं व्याकरणं तथा च इति प्रश्नस्य सिद्धान्तं भाष्यं लक्ष्यलक्षणे व्याकरण व्याकरणमभयत्र दोषं दृष्ट्वा व्याकरणस्य कः पदा निर्णीतं शब्दतत्त्वविदा भगवता पतञ्जलिना। लक्षणं चैतत् समुदितं व्याकरणं भवतीनि मध्वरिः राम इत्यादयः गृह्यन्ते, लक्षणपदेन च पूर्वोक्तभाष्याशयः । लक्ष्यपदेन शब्दाः सुप्युपास्यः, पाणिनिप्रणीतानि वृद्धिरादैच-प्रभृतीनि सूत्राणि प्रवर्तमानः व्याकरणशब्दः अवयवेऽपि प्रवर्तते । तथा कैश्चिद आक्षिप्यते यत् लक्ष्यलक्षणमेतत् समुदिते गृहान्ते । लक्ष्यलक्षणमिति सिद्धान्तभाष्यमवलम्य च केवलं लक्षण सत्रेऽपि व्याकरणशब्दः प्रवर्तते। अत एव सूत्राणि चाप्यधीयान उच्यते वैयाकरण इति प्रकारेण एकदेश सूत्रमपि व्याकरणं स्यात्तत सूत्रं व्याकरणमिति स्वीकारे षष्ठ्यर्थोऽनुपपन्नः सोऽपि दोषः व्यपदेशिवद्भावेन परिहियते। यद्यपरः दोषः शब्दाप्रतिपत्तिः, तस्यापि परिहारः विद्यते। न हि सूत्रत एव शब्दान्प्रतिपद्यन्ते एवं तर्हि व्याख्यानतश्चेति इत्थं न वक्तव्यम्। वस्तुतः सूत्रत एव हि शब्दान्प्रतिपद्यन्ते वृद्धिरादैच इत्यत्र वृद्धिः आत् एच् इत्यादिपदच्छेदादि- व्याख्यानमस्ति भगवता भाष्यकारेण व्याख्यानतः शब्दाः प्रतिपद्यन्ते इति स्वीकृतम्। तच्च वृद्धिः आत् ऐच् सूत्रस्यावयवो वर्तते, एवं प्रकारेण सूत्रैः शब्दाः प्रतिपद्यन्ते इति मन्तव्यमेव। अतः सूत्रं व्याकरण- मिति पक्षे शब्दाप्रतिपत्तिरपि दोषो नास्त्येव।

शब्दे व्याकरणे इति पक्षे दोषान्तरमपि भाष्य कारः व्याचक्षते 'भवे च तद्धित इति'। प्रस्तुतभाष्य- वचनस्य आशयोऽस्ति यत् 'तत्र भवः' इति सूत्रेण भवार्थे अण्प्रत्ययो भवति तत्र व्याकरणे भवो योगः एवं इत्यर्थे व्याकरणशब्दस्य निष्पत्तिर्जायते। एवञ्च यदुच्यते, शब्दो वैयाकरणमिति स्वीकारे शब्दे भवः योगः ' इत्यर्थद्वारा वैयाकरणशब्दस्य निष्पत्तिः भवितुं नार्हति, यतो हि शब्दे सूत्राणि न भवन्ति अपि तु व्याकरणे भवन्ति।

आचार्यः पतञ्जलिः शब्दे व्याकरणे इत्यस्मिन् पक्षे तृतीयं दोषं प्रोवाच-प्रोक्तार्थे तद्धिता इति प्रोक्ते अर्थे 'वृद्धाच्छः प्रभृतिभिः सूत्रैः छप्रत्ययो भवति । शब्दो व्याकरणे इति पक्षे तेन सूत्रेण प्रोक्ते अर्थे छ- प्रत्ययस्य असाधुत्वं भवति, यतो हि पाणिनिना प्रोक्तं व्याकरणमित्यर्थे पाणिनिशब्दात् छप्रत्ययविधाना- नन्तरं पाणिनीयमिति भवति नहि पाणिनिना शब्दाः प्रोक्ताः । अत एवात्र छप्रत्ययस्य विधानं न संभ- वति। इत्थं शब्दो व्याकरणमिति पक्ष नोचित एव।

शब्दो व्याकरणम् इत्यस्मिन् पक्षे समागतानां शब्दे ल्युडर्थः 'भवे च तद्धितः, प्रोक्तादयश्च तद्धिताः'

१. म० भा० पस्पशा ०;

३. पा० सू० ४/२/११४;

५. पा० सू० १/१/१;

२. पा० सू० ४/३/७३।

४. म० भा० पस्पशा ०।

त्रिविधानां दोषाणामपि भाष्यकारेण परिहारः कृतः।| तत्र भाष्ये शब्दे ल्युडर्थ इति विवेचनप्रसङ्गे व्या- क्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्याकरण- मित्यत्र शब्दः व्याकरणद्वारा व्याकृतः, अतः कर्म विद्यते न तु करणमित्युक्तम्। किन्तु शब्दः व्याकरण- मित्यत्राभेदत्त्वात् कर्मकरणव्यवस्था सम्यक्तया न सम्पद्यते। इत्थं करणार्थे विहितः ल्युट्प्रत्ययः अनुपपन्नो जायते। तस्य परिहारं कुर्वता भाष्य- कारेणावादि नावश्यं करणाधिकरणयोरेव ल्युट् विधीयते किं तर्हि अन्येष्वपि कारकेषु 'कृत्यल्युटो बहुलम्' प्रस्कन्दनं प्रपतनम् यथा इत्यत्र 'कृत्यल्युटो बहुलम्' इत्यनेन बाहुलकात् ल्युट् प्रत्ययस्य विधानं भवति, तथैव करणातिरिक्तार्थे बाहुलकात् तेनैव सूत्रेण ल्युट्प्रत्ययविधानात् शब्दो|

ल्युडर्थः दोषाभावात् शब्दो व्याकरणम् इति पक्षः युक्तियुक्तः प्रतीयते।

यद्यपि त्रिविधेषु दोषेषु शब्दे ल्युडर्थः इत्यनेन बाहुलकात्कृतः तथापि बाहुलकत्वात् त्युप्रत्यय- विधानमरुचिपरं यतो हि करणाधिकरणयोश्चेति ल्युट्प्रत्ययविधानार्थं सूत्रसत्त्वात्।

अतः तस्यामरुचौ लक्ष्यलक्षणे व्याकरणमिति व्याकरणस्य सिद्धान्तभूतं स्वरूपं प्रोवाच । शब्दो लक्ष्यः सूत्रं लक्षणमित्युक्त्वा व्याकरणस्वरूपे शब्द- सूत्रयोरुभयोः समावेशः कृतः, तथा च भाष्ये लक्ष्य- लक्षणमेतत् समुदितं व्याकरणं भवतीत्येव व्याकरण- स्य स्वरूपं विविधयुक्त्या समर्थितम् इति भाष्याशयः।

व्याकरणाध्ययनस्य प्रयोजनम्

शङ्खचक्रमहामुद्रा पुस्तकाव्यं चतुर्भुजम्। सम्पूर्णचन्द्रसङ्काशं हयग्रीवमुपास्महे॥१॥

कृतिसाध्यत्वप्रकारकस्य च ज्ञानस्य कारणत्वात्। प्रयोजमनुद्दिश्य न मन्दोऽपि प्रवर्तते इत्युक्तेश्च।

व्याकरणं नामशास्त्रं "शासनाच्छंसनाच्चैव शास्त्रमित्यभिधीयते" यद् विषयकमध्ययनप्रयो- जनज्ञानमपेक्षते तद् विषयकज्ञानं कारणं भवति अत्र मूलं विशेषज्ञाने सामान्यज्ञानं कारणम्।

अतः तादृशी फलविषयिणी प्रयोजनविषयिणी जिज्ञासायां जातायां भगवता भाष्यकृता पतञ्जलि- महामुनिना कानि शब्दानुशासनस्य प्रयोजनानि इत्युक्त्वा व्याकरणाध्ययनप्रयोजनानि स्वीयकण्डुखे- णैव उक्तानि तत्रेयं शङ्का समदेति किमिदं कर्म सन्ध्योपासनादिवत् नित्यमाहोस्वित् काम्यं तत्र सम्पूर्णस्यापि व्याकरणशास्त्रस्यालोडनेन चतुर्विधानि प्रयोजनानि लभ्यन्ते यथा (१) परमपरं प्रयोजनम् (२) परमप्रयोजनम् (३) मुख्यं प्रयोजनम् (४) गौण- प्रयोजनम्, परमप्रयोजनम् यथा मीमांसान्यायादि- सर्वेषां शास्त्राणां मोक्षप्रयोजनम्। तथैव व्याकरण- स्यापि परमपरमप्रयोजनं मोक्षः। उक्तञ्च हरिणा-

अतः किमिदं व्याकरणतत्त्वमिति जिज्ञासायां प्रथमस्तावद् व्याकरणपदार्थों विविच्यते-तद्यथा व्या- क्रियन्ते व्युत्पाद्यन्ते असाधुशब्देभ्यो विविच्य साधु- शब्दाः पृथक्क्रियन्ते येन तद् व्याकरणम्, व्याङुप- सृष्टयोः कृधातोः करणाधिकरणयोश्च इति करणे ल्युटि सति साधुत्वं बोध्यते।

अत्रायमाशयो व्याकृतिकरणं व्याकरणमित्युक्ते आनुसङ्गिकोऽयं सन्देहो जायते कमवधिकृत्य व्याकृतिकरणम्, उक्तसन्देहप्रशमाय विवृयते- असाधुशब्दावधिकसाधुशब्दकर्मकपृथक्कृतिप्रयो- जनकतानियमविशेषो व्याकरणमिति।

इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्। इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः ॥१॥ भाष्यकारोऽपि-

एवंभूतस्य व्याकरणशास्त्रविशेषस्याध्ययनस्य कि प्रयोजनं किमलमिति प्रश्नः पाठकानां हृदि स्वतः जायते कुत इति चेद् अनुबन्धचतुष्टयज्ञा- नोत्तरं प्रवृत्तिसामान्यं प्रति इष्टसाधनत्वप्रकारकस्य

एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्ते स्वर्गे लोके च कामधुग्भवति।

अतः निर्विवादं व्याकरणाध्यायनस्य परमपरम- प्रयोजनं मोक्षः।

प्रयोजनम् इदं शासनकरणभूतं शब्द शास्त्रं वर्तते, तस्मात् शब्दसाधुत्वप्रतिपादनमेव। भाध्यकृतापि अथ शब्दानुशासनमित्युक्त्वा शब्द शास्त्रस्य शब्दसाधुत्वं प्रतिपादनमपि प्रयोजनमुक्तम् यथा-अमरकोषस्य "नामलिङ्गानुशासनं मुख्यं नाम तथैव व्याकरणशास्त्रस्यापि शब्दानुशासनम्" तच्च यौगिकं तत्र इत्थं व्युत्पत्तिः अनुशिष्यन्ते अनेनेति अनुशासनं शब्दानामनुशासनं शब्दानुशासनम्, शब्दसाधुत्वकरणमिति भावः।

अतः निर्गतमेव। शब्दसाधुत्वप्रतिपादनरूपं प्रयोजनं

मुख्यप्रयोजनम्-व्याकरणाध्ययनस्य मुख्य प्रयोजनानि भगवता पतञ्जलिना पञ्च उक्तानि तानि च कानि इति जिज्ञासायामुच्यते "रक्षोहागम- लध्वसन्देहाः प्रयोजनम्। अत्र प्रयोजनशब्दः फलपरक प्रयोजकपरश्च। फलपरके इत्थं व्युत्पत्तिः "प्रयुज्यते विधीयते यत् तत् प्रयोजनम्" फलमित्यर्थः कर्मणि ल्यूटि सति साधुत्वमवधेयम्। प्रयोजकपरत्वे तु प्रयोजयति व्याकरणाध्ययने प्रवर्तयति इति प्रा- प्रयोजनम्। प्रयोजकपरपुल्लिङ्गबाहुलकात् कर्तरि ल्युटि आगम प्रयोजकं न तु फलम्। एवञ्च प्रयो- जनश्च प्रयोजनश्चेति। भवति। वेदोच्चारणप्रक्रिया च परम्परया लभ्यते। यथा-

वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम्। वेदाध्ययनसामान्यादधुना अध्ययनं यथा ॥

गौणप्रयोजनम्-

भगवता पतञ्जलिना कानि पुनः शब्दानु- शासनस्य प्रयोजनानि इत्युक्त्वा त्रयोदशानुषङ्गिकप्रयोज- नानि प्रोक्तानि। (१) तेऽसुरा- तेहसुराहेलयो हेलय इति कुर्वन्तः पराबभूवुः। तस्माद् ब्राह्मणेन नम्ले- च्छितवै नापभाषितैव म्लेच्छो हवा यदपशब्दः (तेह- सुराः) तानि च कानि इति जिज्ञासायां-१. तेहसुराः, २. दुष्टः शब्दः, ३. यदधीतम्, ४. यस्तप्रयुक्ते, ५. अविद्वांसः, ६. विभक्तिं कुर्वन्ति, ७. यो वा- इमाम्, ८. चत्वारि, ९. उतत्वा, १०. सक्तमिव, ११. सारस्वती, १२. दशम्यां पुत्रस्य, १३. सुदेवो- डिसवरुणः।

२. दुष्टः शब्दः इति अत्रायं निष्कर्षो यत् स्व- रतः उदात्तादिवर्णधर्मतः, वर्णतः = आकाशाद्यक्षराद् मिथ्याप्रयुक्तः = अन्यथोच्चारितः, अर्थात् यदर्थबोध- नाय प्रयुक्तः शब्द अर्थान्तरं स्वरवर्णदोषात् प्रतिपाद- यन्त्राभिममित्यर्थः। एवं सति वागेव हिंसकत्वाद् वज्रो भूत्वा यजमानं प्रयोक्तारं हिनस्ति विनाशयति। यथा हिंसितवान्। एवं श्रूयते यत् त्वष्ट्रपुत्रं विश्वरूपम् इन्द्रो हुतवान् तदनन्तरं त्वष्टा इन्द्रं हन्तुं यागं कृतवान्। तत्र (यागे) इन्द्र- शत्रुर्विवर्धस्व, इति मन्त्र ऋत्विजा ऊहितः। इन्द्रशत्रुशब्दस्वरदोषाद्यजमानं

प्रयोजनम् "नपुंसकमनपुंसकेनैकवच्चास्यन्य- तरस्याम्" इति सूत्रेण एकशेषे-नपुंसकस्यैव अव- शेषविभाषया एकवद्भादश्च। अतः प्रयोजनमिति।

वहुत्वे विवक्षिते तु बहुवचनमपि साधुः। अतः व्याकरणाध्ययनस्य किं प्रयोजकत्वं किञ्च फलमिति जिज्ञासा समुदेति अतो हेतो चत्वारि प्रयोजनानि आयान्ति।

अत्र क्षापदेन वेदानां रक्षा अङ्गीक्रियते वेद रक्षणञ्च अर्थज्ञानपुरस्सरं वेदाक्षरराशेः ग्रहणाद्

तत्र इन्द्रस्य शमयिता शातयिता वा भव इति क्रियाशब्दोऽत्र शत्रुशब्दे समाश्रितो जातु रूढिशब्द तदाश्रयणे हि बहुब्रीहितत्पुरुषयोरर्थयोरभेदः। तत्र इन्द्रभिन्नत्वे सिद्धे सति इन्द्रस्य शत्रुः शातयिता मार- को वा भव इति इत्यर्थे प्रतिपाद्ये अन्तोदात्ते प्रयोक्त-
मादकः) यस्य स इति विपरीतार्थकः बहुब्रीहि व्ये आयुदात्त ऋत्विजा प्रयुक्तः, इति तेन इन्द्रशत्रुः समासो जातः तेन इन्द्र एवं वृत्रस्य शमथिता शात थिता वा सम्पत्र कर तस्माददुष्टान् शब्दान् मा प्रयु- ज्यादित्यध्येयं व्याकरणमिति।
दुष्टशब्दस्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह स वाग्वजे यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् इति।
यदधीतम्-
यदक्षीतमविज्ञाते निगदेनैव शब्द्यते। अनाग्नाविव शुष्केन्धो न तज्जलति कर्हिचित्॥१॥
अत्रायं निष्कर्षो यदविज्ञातं अविदितः सुवादि- सरेकारहीनत्वात् अर्थज्ञानरहितत्वाद्वा, निगदेनैव = पाठमात्रेणैव शब्द्यते तत् कर्हिचिदपि न ज्वलति न सफलं भवति। यथा अनग्नौ अग्निरहिते भस्मनि शुष्कैन्धः = नीरसकाष्ठं न ज्वलति निरर्थकं भवति निष्फलञ्च भवति तद्वदित्यर्थः। अर्थश्च व्याकरण- मन्तरा न ज्ञातुं शक्यते। तस्मादनर्थकं माधिगीमही- त्यध्येयं व्याकरणम्।
यस्तु प्रयुङ्क्ते -
अत्रायं निष्कर्षो यद् यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान्यथावद् व्यवहारकाले। सोऽनन्तमा प्नोति जयं परत्र वाग्योगवद् दुष्यति चापशब्दैः। यथार्थशब्दज्ञाने कुशलो मनुष्यः व्यवहारकाले यथा स्थानप्रयत्नं ग्रस्तनिरस्तादिदोषरहितं शब्दान् प्रयुङ्क्ते स वाग्योगविद परत्र परलोके अनन्तं जयं प्राप्नोति लभते तथा च अवाग्योगविद् अपशब्दैः = अशुद्धोच्चारणैः दुष्यति पापीयान् भवति।
अविद्वांसः -
प्लुतः कार्यः। यस्तु प्लुतं कर्तुं न प्रभवति स स्त्री- पिवादे-अभिवादानन्तरप्रयुज्ये वचने हि गुरुणां वदवक्तव्यः। अयमहमिति न तु अमुकगोत्रोत्पत्रोऽहं यमुकशर्माहं यो गुरोस्त्वमहं अभिवादयेत्याि सङ्केतेन वाक्येन। अर्थात् स्त्रीषु नामगोत्रोच्चारण- पूर्वकान् अभिवादनं न क्रियते किन्तु "इयमहं नमामि" इत्युक्त्वा अभिवादनमात्रं क्रियते तया अविद्वत्स्वपि व्यवर्तव्यमित्यर्थः। तथा च व्या करणाध्ययनं विना नाम्नः प्लुतादिविज्ञानं भवितुन्नार्हति तदभावे च जनः अविद्वान् भूत्वा स्त्रीवदसम्पद्यते। तस्मात् स्त्रीवन्माभूम इत्यध्येयं व्याकरणम्धते
विभक्तिं कुर्वन्ति-
याज्ञिकाः पठन्ति प्रयाजाः सविभक्तिकाः कर्तव्या। न चान्तरेण व्याकरणं प्रयाजाः सविभक्ति- का शक्याः कर्तुम्। यथा हि उक्तं ब्राह्मणेन यत् प्रयाजाऽनुयाजेस्वेव विभक्तिः कुर्यात् तत्प्रकरवस्य ब्राह्मणा वाक्यमपि साधारणम्। प्रयाजाः सविभक्ति- काः कर्तुं दज्ञा भवेम इत्यध्येयं व्याकरणम्।
यो वा इमाम्-
यो वा इमाम् पदशस्वरसोऽक्षशोवाचं विद- धति स आत्विजिनो भवति। ऋत्विजिनमहतीति आत्विजिनः अर्थात् यो वै निश्चयेन इमां सन्निहितम- परोक्षां वाचं वेदरूपां वाणि पदं पदं स्वरं स्वरं अक्षर- मक्षरं विदधाति संस्करोति स आत्विजिनो भवति। यजमान ऋत्विककर्मा हि भवतीति विज्ञेयम्। पदस्व- राक्षरविज्ञानञ्च व्याकरणादेव भवितुमर्हति तस्मा- दात्विजिनाः स्याम् इत्यध्येयं व्याकरणम्। विशेषतोऽत्र विदधाति करोति उच्चारयति इत्यत्र क्रिया सामान्यात् क्रियाविशेषः विवक्षितोऽस्ति वाजसनेयप्रातिशाख्येऽपि लिखितं यत् "वर्णशोऽक्षर- शोक्षानात विभक्तिपदशोऽपि च" इति।
अविद्वांसप्रत्यभिवादे नाम्नो येन प्लतिंविदुः। कामं तेषु तु विप्रोष्यस्त्रीष्विलायमहं वदेत्। प्रत्य
चत्वारि-
सक्तमिव-
पवनं भवति। तववृद्धा तुत्रवृद्धा। धीराध्यानवन्तः मनसा पज्ञानेन। वाचमक्रत वाचमकृषत। अत्र "सक्कुमिव तितऊना पुनन्तो यत्र धीरा मनसा वाचमकत। अत्रा सखाय सख्याति जानते मदैषां लक्ष्मीनी इताधिवापि" सक्तुः सचतेदुर्धावों मवति। कसतेर्वा विपरीताद् विकसितो भवति। तितउपरि- सखायः सन्त सख्यानि जानते। क्व य एष् दुर्गमो मार्ग एकगम्यो वाग्विषयः। के पुत्रस्ते। वैयाकरणः कुतः एतत्। भत्रैषा लक्ष्मीर्निहितां अधिवाचि। एषां वाचि भद्रालक्ष्मीनिहिता भवति। लक्ष्मी लक्ष-णात् भासनात् परिवृढा भवति। (सत्तुमिव)
चत्वारि श्रृङ्गा प्रयोऽस्य पादपा हे शीयें सप्तहस्तासोऽस्य त्रिधा रुद्धो दृश्यो शेरकीति महोदेवो मर्त्यांमाविवेश। महान् देवशब्दमरणाधमर्माणो मनुष्यास्ताल अविवेश महता देवेन नः साङ्ग सायुज्यं स्यादित्येध्येयं व्याकरणम्। तदुक्ते भर्तृहरिणापि अपिप्रयुक्त-रात्मानं शब्दमन्त्रवधितम्। प्राहुर्महान्तमृषर्भ येन सायुज्यभिष्यते। पूर्वोतमेवार्थ मन्त्रान्तरोऽपि विशदयति चत्वारि वावपरिमितापदानि तानि विदुर्बाह्मणा ये मनिषिणः गुह्मयां त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति।
दशम्यां पुत्रस्य -

सारस्वतीं-
याशिका पठन्ति दशम्युतरं कालं पुत्रस्य जातस्य नामकरणं विदध्यात् "पौषघोषववदाधन्य- तरन्तः स्थमवृदं चिपुरुषानकमनरि प्रतिष्ठितम्" तद्धि प्रतिष्ठिततमं भवति । द्वयक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्त्र तद्धितम् इति । न चान्तरेण व्याकरणं कृदन्तमकृतस्तद्धिता वा शक्या विज्ञातं दशम्यां पुत्रस्य।
याज्ञिका पठन्ति अहिताग्निरपशब्दं प्रयुज्य- प्रायश्चित्तीयां सारस्वती मिष्ठिर् निर्वपेत । प्रायश्चिततीयां मा भूमा भूमेत्येध्येयं व्याकरणम्। (सारस्वातीम्) सुदेवोऽसि-
उतत्वः -
उतत्वः पश्यन्नददर्श वाचमुतः त्वः शृष्वन्न शृणोत्येनाम्। उतो त्वस्मै तन्वं विसस्त्रे जायेवपत्य उशती सुवासाः। उतत्व अपि खल्वेकः पश्यन्नपि न पश्यति वाचम् अपि खल्वेकः शृण्वन्नपि न शृणो त्येनामिति अविद्वांसमाहाधर्म। उतो त्वस्मै तन्वं विसत्रे तनुं विवृणुते। जायेव पत्य उशती सुवासाः। तद्यथा जायापत्येकामयमाना सुवासा स्वमात्मानं विवृणुते। एवं वागवागविदे स्वात्मानं विवृणुते। वाङ्लो विवृणुयादात्मानमित्यध्येयं व्याकरणम्।
"सुदेवो असि वरुण यस्यते सप्तसिन्धवः अनुक्षरन्ति काकुदम् सुर्यं सुषिरामिव। सुदेवो असि वरुण सत्यदेवोऽसि" यस्यते सप्तसिन्धः सप्त- विभक्तयः अनुक्षरन्ति काकुदम्। काकुदे तालु काकु- जिह्वा, सास्मिन्नुद्यते इति काकुदम्। सूर्म्य सुषिरा- मिव। तद्यथा-शोभना मूर्ति सुषिरामग्निरन्तः प्रविश्य दहति एवं ते सप्तसिन्धव सप्तविभक्तयस्ताल्वनुक्षरन्ति। तेनासि सत्यदेव। सत्ये देवाः स्यामेत्यध्येयं व्याकरणमिति दिक्।

## सन्दर्भ ग्रन्थ सूची

१.महाभाष्यम्-२/२/२४। (चौखंबा प्रकाशन वाराणसी 2002)
२. शुक्लय०-६/३-उव्वटभाष्यम्। (शारदा प्रकाशन वाराणसी 2001)
३. ऋ० सं० १०/६१/२३-सायणभाष्यम्।
४. तै० सं०-७/२/१०-भट्टभास्करभाष्यम्।विश्वविद्यालय प्रकाशन चौक बाजार वाराणसी 2006)
५. ऋ० सं० १०/११४/४-सायणभाष्यम्।
६. अथर्व ०-१/२६/४-सायणभाष्यम्।(शारदा प्रकाशन वाराणसी 2001)
७. प्रदीपः २/३/२.
८. ऋ० सं० ३/४१/८-९ सायणभाष्यम्; (विश्वविद्यालय प्रकाशन चौक बाजार वाराणसी 2005)
९. तत्रैव ६/५९/२ स्कन्दभाष्यम्।
१०. तत्रैव १/३२/४.
११. वाररुचनिरुक्तसमुच्चयः ४/९.
१२. प्रदीपः ७/३/४६.
१३. प्रक्रियाकौमुदी, भूमिका पृ० ३१.
१४. कुमारसम्भवम् ६/६७ नारायणव्याख्या।
१५. द्र० सरस्वतीकण्ठाभरणम् १/१/२६, हृदयहारिणीव्याख्या।
१६. द्र० गरुडापुराणम् अध्यायः-७; नित्या० षोड० परिशि० २।
१७. ऋ० सं० ८/२८/३; १०/४५/७ सायणभाष्यम्।